स्निग्धो यावत्क्षणान् दृश्यस्तावन्मासान् सुभिक्षदः।
ध्रुवकेतुस्त्वनियतगतिवर्णाकृतिर्बुधः ॥
दिव्यान्तरीक्षभौमोऽयं स्निग्ध इष्टः स नान्यथा।
सेनाङ्गेषु महीन्द्राणां देशस्य गिरिशाखिषु ॥
उपस्करेषु गृहिणां दृश्यते च विनाशकृत् ।
इत्यादुक्त्वा यदागस्त्यं केतुर्व्याप्युपधूपयेत् ॥
दुर्भिक्षं मरकश्चैव तदा जगति जायते ।
यदा तु भार्गवं प्राप्य धूमकेतुः प्रधूपयेत् ॥
तदा सैन्यानि वध्यन्ते यत्रोद्युक्ता नराधिपाः।
यात्रागताश्च ये सार्था असमन्ताश्च ये जनाः ॥
तथा चारगणाः सर्व्वे भयमृच्छन्ति दारुणम् ।
यदा प्रधूपयेत् केतुः सप्तर्षीन् ध्रुवमेव च ॥
तदा लोकाः क्षयं यान्ति सलिलञ्चापि शुष्यति ।
धूमकेतुर्यदा राज्ञो दृश्यते विषये क्वचित् ॥
सराष्ट्रः सपुरो राजा क्षिप्रमेव प्रणश्यति ।
यावन्त्यहानि दृश्यन्ते तावन्मासान् फलप्रदाः ॥
मासैरब्दान् विजानीयात् प्रथमे तु त्रिपक्षतः”॥*॥
“केतूत्पाते तु सर्व्वस्मिन् सभये समुपस्थिते ॥
महाशान्तिं प्रकुर्व्वीत विविधां भूरिदक्षिणाम् ।
धनं वा सर्व्वमुत्सृज्य मृत्योर्म्मुच्येत बन्धनात् ॥
दद्याद्वा पृथिवीं सर्व्वां राजा शान्तिं नियच्छति।
अकस्माद्दृश्यते केतुरुदयेऽस्तमयेऽपि वा ॥
निहन्त्यन्तःपुरे राज्ञो ज्वरः पित्तोद्भवो भवेत् ।
दधिमधुघृताक्तानां पुष्पाणामयुतं ततः ॥
जुहुयादिङ्गनीलस्य केतुं दद्याद्द्विजातये ।
भूमिलं हेमरत्नाद्यैस्ततः सम्पद्यते शुभम्” ॥
इति मथुरानाथविद्यालङ्कारकृतसमयामृते केतूत्पाताः समाप्ताः॥ केतुगणः कुशद्वीपजातः जैमिनिमुनेः सन्तानः षड़ङ्गुलः धूम्रवर्णः मृगवाहनः शूद्रवर्णः विकृताननः सूर्य्याभिमुखः रुद्रः धूम्रवसनः वरदः गदाधरश्च। तस्याधिदेवता चित्रगुप्तः प्रत्यधिदेवता ब्रह्मा। इति ग्रहयागतत्त्वम् ॥ अस्य स्वरूपं शनिराहुवत् । स च शिखावान् अनेकरूपः। इति जातकम् ॥ * ॥ रोगः। पताका। (यथा, रघौ ७।६५।

“सशोणितैस्तेन शिलीमुखाग्रै-
र्निक्षेपिताः केतुषु पार्थिवानाम्” ॥)

उत्पातः। (यथा, मनुः १।३८।
“उल्कानिर्घातकेतूंश्च ज्योतींष्युच्चावचानि च” ॥)
चिह्नम्। इति मेदिनी। (यथा, रघुः २।३३।

“तमार्य्यगृह्यं निगृहीतधेनु-
र्मनुष्यवाचा मनुवंशकेतुम् ।
विस्माययन् विस्मितमात्मवृत्तौ
सिंहोरुसत्वं निजगाद सिंहः” ॥)

दीप्तिः। इति हेमचन्द्रः। (सूर्य्यः। यथा, ऋग्वेदे १०।८।१। “प्रकेतुना बृहता यात्यग्निः”। तत्रैव। ३।३४।४ “प्रारोचयन् मनवे केतुमह्नाम्”। रश्मिः। यथा, ॐ उदुत्यं जातवेदसं देवं वहन्ति केतवः दृशे विश्वाय सूर्य्यम्” ॥)

केतुभः, पुं, (केतुरिव भातीति। भा+कः।) मेघः। इति शब्दमाला ॥

केतुमालं, क्ली, जम्बुद्वीपस्य नवखण्डान्तर्गतखण्डविशेषः। इति त्रिकाण्डशेषः॥ (क्वचित् पुंलिङ्गोऽपि दृश्यते। यथा, महाभारते ६।६।३२।
“मेरोस्तु पश्चिमे पार्श्वे केतुमालो महीपते !।
जम्बुखण्डे च तत्रैव महाजनपदो नृप” ॥
आग्नीध्रराजपुत्त्रः स्वायम्भुवमनोः प्रपौत्त्रश्च। यथा, भागवते ५।२।२०।
“तस्यामु ह वा आत्मजान् स राजवर आग्नीध्रो नाभिकिम्पुरुषहरिवर्षेलावृतरम्यकहिरण्मयकुरुभद्राश्वकेतुमालसंज्ञान् नवपुत्त्रानजनयत्” ॥
स्त्री, नदी। यथा, महाभारते। ३।८९।१४।
“ततः पुण्यतमा राजन् ! सततं तापसैर्युता।
केतुमाला च मेध्या च गङ्गाद्वारञ्च भूमिप !” ॥)

केतुरत्नं, क्ली, (केतोः रत्नं केतुभिः रश्मिभिः युक्तं वा रत्नम्।) वैदूर्य्यमणिः। इति राजनिर्घण्टः ॥

केदरः, पुं, (के मस्तके दृणाति। दॄ+अच्। केन दीर्य्यते वा। दॄ+अप् कर्म्मणि।) वृक्षविशेषः। इति लिङ्गादिसंग्रहे अमरः। टेरके त्रि। इति शब्दरत्नावली ॥

केदारः, पुं, (के जले दार आदरो यस्य। यद्वा केन जलेन द्रियते आद्रियते इति। निपातनात् रत्वम्।) क्षेत्रम्। क्षेत् इति भाषा। इत्यमरः। २।९।११॥ (यथा, मनौ ९।३८।
“भूमावप्येककेदारे कालोप्तानि कृषीवलैः।
नानारूपाणि जायन्ते वीजानीह स्वभावतः” ॥
क्षेत्रस्थक्षुद्रजलाधारविशेषः। यथा, रामायणे ३।२२।१८।
“वृषः पिबति केदारे निश्वासाकुलितं पयः” ॥)
केदारजलगुणाः। मधुरत्वम्। विपाके गुरुत्वम्। दोषलत्वम्। “तदेव बद्धमुक्तन्तु विशेषाद्दोषदं भवेत्”। इति राजनिर्घण्टः॥ (के मस्तके शिखर देशे दारः प्रस्रवणादिकारणस्वरूपविदीर्णस्थानं यस्य।) पर्व्वतविशेषः। (के मस्तके शिरःस्थितजटाभ्यन्तरे गङ्गारूपिणी दाराः पत्नी यस्य सर्व्वत्र निपातनात् रत्वम्।) शिवः। भूमिभेदः। आलवालम्। इति मेदिनी॥ (भ्रूमध्यस्थानविशेषः। यथा, हठयोगदीपिकायाम्। ३।२४।
“कालपाशमहाबन्धविमोचनविचक्षणः।
त्रिवेणीसङ्गमं धत्ते केदारं प्रापयेन्मनः” ॥
“केदारभ्रुवोर्मध्ये शिवस्थानं केदारशब्दवाच्यं तं मनः स्वान्तं प्रापयेत्”। इति तट्टीका॥ तीर्थविशेषः। यथा, महाभारते। ३।८३।६६।
“केदारे चैव राजेन्द्र ! कपिलस्य महात्मनः।
ब्रह्माणमधिगत्वा च शुचिः प्रयतमानसः।
सर्व्वपापविशुद्धात्मा ब्रह्मलोकं प्रपद्यते” ॥ * ॥
केदारपर्व्वतस्थलिङ्गभेदः। स तु लिङ्गमूर्त्या काश्यामाविर्भावात् तन्नाम्ना एवाख्यातः तद्विवरणं यथा, काशीखण्डे। ७७ अध्याये।

श्रीपार्व्वत्युवाच।

“नमस्ते देवदेवेश ! प्रणमत्करुणानिधे !।
वद केदारमाहात्म्यं भक्तानामनुकम्पया ॥
तस्मिन् लिङ्गे सदा प्रीतिस्तव काश्यामनुत्तमा।
तद्भक्ताश्च जना नित्यं देवदेव ! महाधियः॥

श्रीदेवदेव उवाच।

शृणवपर्णेऽभिधास्यामि केदारेश्वरसंकथाम्।
समाकर्ण्यापि यां पापोऽप्यपापो जायते क्षणात् ॥
केदारं यातुकामस्य पुंसो निश्चितचेतसः।
आजन्मसञ्चितं पापं तत्क्षणादेव नश्यति ॥
गृहाद्विनिर्गते पुंसि केदारगतिनिश्चिते।
जन्मद्वयार्ज्जितं पापं शरीरादपि निर्व्रजेत्॥
मध्येमार्गं प्रपन्नस्य त्रिजन्मजनितं त्वघम्।
देहगेहादिनिःस्नेह निराशं याति निश्वसत्॥
सायं केदार केदार केदारेति चिरञ्चरन्।
गेहेऽपि निवसन्नूनं यात्राफलमवाप्नुयात्॥
दृष्ट्वा केदारशिखरं पीत्वा तत्रत्यमम्बु च।
जन्मजन्मकृतात्पापात् मुच्यते नात्र संशयः॥
हरपापह्रदे स्नात्वा केदारेशं प्रपूज्य च।
कोटिजन्मार्ज्जितैनोभिर्मुच्यते नात्र संशयः॥
सकृत्प्रणम्य केदारं हरपापकृतोदकः।
स्थाप्य लिङ्गं हृदम्भोजे प्रान्ते मोक्षं गमिष्यति॥
हरपापह्रदे श्राद्धं श्रद्धया यः करिष्यति।
उद्धृत्य सप्त पुरुषान् स मे लोकं गमिष्यति॥
पुरा रथन्तरे कल्पे यदभूदत्र तत् शृणु।
अपर्णे दत्तकर्णा त्वं वर्णयामि तवाग्रतः॥
एको ब्राह्मणदायाद उज्जयिन्या इहागतः।
कृतोपनयनः पित्रा ब्रह्मचर्य्यव्रते स्थितः॥
स्थलीं पाशुपतीं काशीं स विलोक्य समन्ततः।
द्विजैः पाशुपतैः कीर्णां जटामुकुटमण्डितैः॥
कृतलिङ्गसमर्च्चैश्च भूतिभूषितवर्ष्मभिः।
भिक्षाहृतान्नसन्तुष्टैः पुष्टैर्गङ्गोदकामृतैः॥
बभूवानन्दितमना व्रतं जग्राह चोत्तमम्।
हिरण्यगर्भादाचार्य्यान्महत्पाशुपताभिधम्॥
स च शिष्यो वशिष्ठोऽभूत् सर्व्वपाशुपतोत्तमः
स्नात्वा ह्रदे हरपापे नित्यं प्रातः समुत्थितः॥
विभूत्याहरहः स्नाति त्रिकालं लिङ्गमर्च्चयन्।
नान्तरं स विजानाति शिवलिङ्गे गुरौ तथा॥
स द्वादशाब्ददेशीयो वशिष्ठो गुरुणा सह।
ययौ केदारयात्रार्थं गिरिं गौरीगुरोर्गुरुम्।
यत्र गत्वा न शोचन्ति किञ्चित् संसारिणः क्वचित्
प्राश्योदकं लिङ्गरूपं लिङ्गरूपत्वमागताः।
असिधारं गिरिं प्राप्य वशिष्ठस्य तपस्विनः।
गुरुर्हिरण्यगर्भाख्यः पञ्चत्वमगमत् तदा।
पश्यतां तापसानाञ्च विमाने सार्व्वकामिके॥
आरोप्य तं पारिषदाः कैलासमनयन् मुदा।
यस्तु केदारमुद्दिश्य गेहादर्द्धपथेऽप्यहो॥
अकातरस्त्यजेत् प्राणान् कैलासे स चिरं वसेत्।
तदाश्चर्य्यं समालोक्य स वशिष्ठस्तपोधनः॥
केदारमेव लिङ्गेषु बह्वमंस्त सुनिश्चितम्।
अथ कृत्वा स केदारीं यात्रां वाराणसीमगात्॥
अग्रहीन्नियमं चापि यथार्थं चाकरोत् पुनः।
प्रतिचैत्रं सदा चैत्र्यां यावज्जीवमहं ध्रुवम्॥
विलोकयिष्ये केदारं वसन् वाराणसीं पुरीम्।
तेन यात्राः कृताः सम्यक् षष्टिरेकाधिका मुदा॥
आनन्दकानने नित्यं वसता ब्रह्मचारिणा।
पुनर्यात्रां स वै चक्रे मधौ निकटवर्त्मनि॥